# ॥ ककारादि श्रीकूर्माष्टोत्तरशतनामावलिः ॥

.. kakArAdi shrI kUrmAShTottarashatanAmAvaliH ..

sanskritdocuments.org

July 25, 2016

# Document Information

Text title : kakArAdi kUrmAShTottarashatanAmAvaliH
File name : kakArAdikUrma108nAmAvaliH.itx
Category : aShTottarashatanAmAvalI
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ ककारादि श्रीकूर्माष्टोत्तरशतनामावलिः ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

ॐ कमठाय नमः ।
ॐ कन्धिमध्यस्थाय नमः ।
ॐ करुणावरुणालयाय नमः ।
ॐ कुलाचलसमुद्धर्त्रे नमः ।
ॐ कुण्डलीन्द्रसमाश्रयाय नमः ।
ॐ कठोरपृष्ठाय नमः ।
ॐ कुधराय नमः ।
ॐ कलुषीकृतसागराय नमः ।
ॐ कल्याणमूर्तये नमः ।
ॐ क्रतुभुक्प्रार्थनाधृत विग्रहाय नमः । १०
ॐ कुलाचलसमुद्भ्रान्तिघृष्टकण्डूतिसौख्यवते नमः ।
ॐ करालश्वाससङ्क्षुब्धसिन्धूर्मिप्रहताम्बराय नमः ।
ॐ कन्धिकर्दमकस्तूरीलिप्तवक्षस्थलाय नमः ।
ॐ कृतिने नमः ।
ॐ कुलीरादिपयस्सत्त्वनिष्पेषणचतुष्पदाय नमः ।
ॐ कराग्रादत्तसम्भुक्ततिमिङ्गिलगिलोत्कराय नमः ।
ॐ कन्धिपुष्पद्विरेफाभाय नमः ।
ॐ कपर्द्यादिसमीडिताय नमः ।
ॐ कल्याणाचलतुङ्गात्मगाधीकृतपयोनिधये नमः ।
ॐ कुलिशात्पृष्ठसङ्घर्षक्षीणमूलकुलाचलाय नमः । २०
ॐ काश्यपीसत्कुचप्रायमन्दराहतपृष्ठकाय नमः ।
ॐ कायैकदेशापर्याप्तशेषदिग्गजमण्डलाय नमः ।
ॐ कठोरचरणाघातद्वैधीकृतपयोनिधये नमः ।
ॐ कालकूटकृतत्रासाय नमः ।
ॐ काण्डदुर्मितवैभवाय नमः ।
ॐ कमनीयाय नमः ।
ॐ कविस्तुत्याय नमः ।
ॐ कनिधये नमः ।
ॐ कमलापतये नमः ।

ॐ कमलासनकल्याणसन्धात्रे नमः । ३०
ॐ कलिनाशनाय नमः ।
ॐ कटाक्षक्षतदेवार्तये नमः ।
ॐ केन्द्रादिविधृतांजलये नमः ।
ॐ कालीपतिप्रीतिपात्राय नमः ।
ॐ कामितार्थप्रदाय नमः ।
ॐ कवये नमः ।
ॐ कूटस्थाय नमः ।
ॐ कूटकमठाय नमः ।
ॐ कूटयोगिसुदुर्लभाय नमः ।
ॐ कामहीनाय नमः । ४०
ॐ कामहेतवे नमः ।
ॐ कामभृते नमः ।
ॐ कंजलोचनाय नमः ।
ॐ क्रतुभुग्दैन्यविध्वंसिने नमः ।
ॐ क्रतुभुक्पालकाय नमः ।
ॐ क्रतवे नमः ।
ॐ क्रतुपूज्याय नमः ।
ॐ क्रतुनिधये नमः ।
ॐ क्रतुत्रात्रे नमः ।
ॐ क्रतूद्भवाय नमः । ५०
ॐ कैवल्यसौख्यदकथाय नमः ।
ॐ कैशोरोत्क्षिप्तमन्दराय नमः ।
ॐ कैवल्यनिर्वाणमयाय नमः ।
ॐ कैटभप्रतिसूदनाय नमः ।
ॐ क्रान्तसर्वाम्बुधये नमः ।
ॐ क्रान्तपातालाय नमः ।
ॐ कोमलोदराय नमः ।
ॐ कन्धिसोर्मिजलक्षौमाय नमः ।
ॐ कुलाचलकचोत्कराय नमः ।
ॐ कटुनिश्श्वासनिर्धूतरक्षस्तूलाय नमः । ६०
ॐ कृताद्भुताय नमः ।
ॐ कौमोदकीहतामित्राय नमः ।
ॐ कौतुकाकलिताहवाय नमः ।
ॐ कराशिकंटकोद्धर्त्रे नमः ।

ॐ कविताब्धिमणीसुमाय नमः ।
ॐ कैवल्यवल्लरीकन्दाय नमः ।
ॐ कन्दुकीकृतचन्दिराय नमः ।
ॐ करपीतसमस्ताब्धये नमः ।
ॐ कायान्तर्गतवाश्चराय नमः ।
ॐ कर्पराब्दद्विरेफाभमन्दराय नमः । ७०
ॐ कन्दलत्स्मिताय नमः ।
ॐ काश्यपीव्रततीकन्दाय नमः ।
ॐ कश्यपादिसमानताय नमः ।
ॐ कल्याणजालनिलयाय नमः ।
ॐ क्रतुभुङ्नेत्रनन्दनाय नमः ।
ॐ कबन्धचरहर्यक्षाय नमः ।
ॐ क्रान्तदर्शिमनोहराय नमः ।
ॐ कर्मठाविषयाय नमः ।
ॐ कर्मकर्तृभावादिवर्जिताय नमः ।
ॐ कर्मानधीनाय नमः । ८०
ॐ कर्मज्ञाय नमः ।
ॐ कर्मपाय नमः ।
ॐ कर्मचोदनाय नमः ।
ॐ कर्मसाक्षिणे नमः ।
ॐ कर्महेतने नमः ।
ॐ कर्मज्ञानविभागकृते नमः ।
ॐ कर्त्रे नमः ।
ॐ कारयित्रे नमः ।
ॐ कार्याय नमः ।
ॐ कारणाय नमः ।
ॐ करणाय नमः ।
ॐ कृतये नमः ।
ॐ कृत्स्नाय नमः ।
ॐ कृत्स्नातिगाय नमः ।
ॐ कृत्स्नचेतनाय नमः ।
ॐ कृत्स्नमोहनाय नमः ।
ॐ करणागोचराय नमः ।
ॐ कालाय नमः ।
ॐ कार्यकारणतातिगाय नमः ।
ॐ कालावशाय नमः । १००

ॐ कालपाशबद्धभक्तावनाभिधाय नमः ।
ॐ कृतकृत्याय नमः ।
ॐ केलिफलाय नमः ।
ॐ कीर्तनीयाय नमः ।
ॐ कृतोत्सवाय नमः ।
ॐ कृतेतरमहानन्दाय नमः ।
ॐ कृतज्ञाय नमः ।
ॐ कृतसत्सुखाय नमः । १०८

॥ इति ककारादि श्री कमठावताराष्टोत्तरशतम् पराभव वैशाख बहुलद्वादश्यां लिखितं रामेण समर्पितं च श्री हयग्रीवदेवाय ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

<◌ःॢ>

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. kakArAdi shrI kUrmAShTottarashatanAmAvaliH ..
was typeset on July 25, 2016

Please send corrections to *sanskrit@cheerful.com*